## प्राद्वहः । (८१/२७४७)

'वह प्रापणे' (धा. पा. १००४) स्वरितेत् । [1]तत्र कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदे प्राप्ते परस्मैपदं विधीयते । प्रपूर्वाद् वहतेः परस्मैपदं भवति । [2]प्रवहति, [3]प्रवहतः, प्रवहन्ति । प्रात् इति किम् ? आवहते ॥

## परेर्मृषः । (८२/२७४८)

'मृष तितिक्षायाम्' (धा. पा. ११६५) स्वरितेत् । ततः[4]तथैवात्मनेपदे प्राप्ते परस्मैपदं विधीयते । परिपूर्वाद् [5]मृष्यतेः परस्मैपदं भवति । [6]परिमृष्यति, [7]परिमृष्यतः, परिमृष्यन्ति । परेः इति किम् ? आमृष्यते । [8]वहतिमपि केचिदत्रानुवर्तयन्ति–परिवहति ॥

## व्याङ्परिभ्यो रमः । (८३/२७४९)

'रमु क्रीडायाम्' (धा. पा. ८५४) । अनुदात्तेत्त्वा[9]दात्मनेपदे प्राप्ते परस्मैपदं विधीयते । वि आङ परि इत्येवंपूर्वात् रमतेः परस्मैपदं भवति । विरमति । आरमति । परिरमति । [10]एतेभ्यः इति किम् ? अभिरमते[11] ॥

## उपाच्च । (८४/२७५०)

रमः [12]इत्येव । उपपूर्वात् रमतेः परस्मैपदं भवति । देवदत्तमुपरमति । यज्ञदत्तमुपरमति । उपरमयति इति यावत् । अन्तर्भावितण्यर्थोऽत्र [13]रमिः । पृथग्योगकरणमुत्तरार्थम् । अकर्मकाद् विभाषां वक्ष्यति, सा उपपूर्वादेव यथा स्यात् ॥

## विभाषाऽकर्मकात् । (८५/२७५१)

रमः उपात् इति [14]च वर्तते । पूर्वेण नित्ये परस्मैपदे प्राप्ते [15]विकल्प आरभ्यते । उपपूर्वाद् रमतेरकर्मकाद् विभाषा परस्मैपदं भवति । यावद्भुक्तमुपरमति, यावद्भुक्तमुपरमते । [16]निवर्तते इत्यर्थः ॥

## बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः । (८६/२७५२)

'णिचश्च' (१.३.७४/२५६४) इति कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदे प्राप्ते परस्मैपदं विधीयते । बुध युध नश जन इङ प्रु द्रु स्रु इत्येतेभ्यो ण्यन्तेभ्यः परस्मैपदं भवति । बोधयति । योधयति । नाशयति । जनयति । अध्यापयति । प्रावयति । द्रावयति । स्रावयति ।

---

1. ततः क, तत्रैव कर्त्रभिप्राये क्रियाफले फ. 2. प्रवहति गङ्गा अ. 3. प्रवहतः प्रवहन्ति नास्ति अ. फ. 4. पूर्ववत् क. 5. मृषेः धातोः अ. 6. परिमृषति अ. 7. परिमृष्यतः, परिमृष्यन्ति नास्ति अ. क. 8. वह इति क. फ. 9. आत्मनेपदी ततः क. फ, अत्मनेपदी अनुदात्तेत् ह. 10. वि-आङ परिभ्यः क. फ. 11. आसने इत्यधिकम् फ. 12. इत्यनुवर्तते क, इति वर्तते फ. 13. रमतिः फ. 14. च नास्ति ड. 15. विभाषा क. फ. 16. तावत् इत्यधिकम् अ.